Amarakosha

स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः
ऐरावतोऽभ्रमातङ्गैरावणाऽभ्रमुवल्लभाः
ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः
व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः
स्यात् सुधर्मा देवसभा पीयूषममृतं सुधा
मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः
पञ्चैते देवतरवो मन्दारः पारिजातकः
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्
सनत्कुमारो वैधात्रः स्ववैद्यावश्विनीसुतौ
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ
स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उपर्बुधः
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः
शुचिरप्पित्त मौर्वस्तु वाडवो वडवानलः
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखाः स्त्रियाम्
त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ
उल्का स्यात् निर्गतज्वाला भूतिर्भसितभस्मनी
क्षारो रक्षा च दावस्तु दवो वनहुताशनः
धर्मराजः पितृपतिः समवर्ती परेतराट्
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः
राक्षसः कोणपः क्रव्यात् क्रव्यादोऽस्रप आशरः
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः
यातुधानः पुण्यजनो नैरृतो यातुरक्षसी
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः
श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः
पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽऽशुगाः
समीरमारुतमरुत्जगत्प्राणसमीरणाः
नभस्वद्वातपवनपवमानप्रभञ्जनाः
प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः
शरीरस्था इमे रंहस्तरसी तु रयः स्यदः
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्
सत्वरं चपलं तूर्णमविलम्बितमाशु च
सततेऽनारताऽश्रान्तसंतताविरतानिशम्
नित्याऽनवरताऽजस्रमप्यथाऽतिशयो भरः
अतिवेलभृशाऽत्यर्थाऽतिमात्रोद्गाढनिर्भरम्
तीव्रैकान्तनितान्तानिगाढबाढदृढानि च
क्लीबे शीघ्राऽऽद्यसत्त्वे स्यात् त्रिष्वेषं सत्त्वगामि यत्
कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः
मनुष्यधर्मा धनदो राजराजो धनाधिपः
किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः
यक्षैकपिङ्गलविलश्रीदपुण्यजनेश्वराः
अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्
स्यात् किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः
निधिर्नाशेवधिर्भेदाः पद्मशङ्खाऽऽदयो निधेः
द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्
वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी
विहासयोऽपि नाकोऽपि द्युरपि स्यात् तदव्यम्
तारापथोऽन्तरिक्षं च मेघाध्वा च महाबिलम्
विहायाः शकुने पुंसि गगने पुंनपुंसकम्
दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः
उत्तरादिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भवे
अवाग्भवमवाचीनमुदीचीचीनमुदग्भवम्
प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्
कुबेर ईशः पतयः पूर्वाऽऽदीनां दिशां क्रमात्
रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः
बुधोबृहस्पतिश्चेति दिशां चैव तथा ग्रहाः
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः
करिण्योऽभ्रमुकपिलापिङ्गलाऽनुपमाः क्रमात ॥
ताम्रकर्णी शुभ्रदन्ती चाऽङ्गना चाऽञ्जनावती
क्लीबाऽव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्
अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम्
अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत्
घनजीमूतमुदिरजलमुग्धूमयोनयः
कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम्
स्तनितं गर्जितम मेघनिर्घोषे रसिताऽदि च
शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा
तडित्सौदामिनी विद्युच्चञ्चला चपला अपि

स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम्
वृष्टिवर्षं तद्विघातेऽवग्राहाऽवग्रहौ समौ
धारासम्पात आसारः शीकरोम्बुकणाः स्मृताः
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम्
अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्
अपिधानतिरोधानपिधानाऽऽच्छादनानि च
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः
कला तु षोडषो भागो बिम्बोऽस्त्री मण्डलं त्रिषु
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंशके
चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता
कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्
सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः
अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्
प्रालेयं मिहिका चाऽथ हिमानी हिमसंहतिः
शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः
तुषारः शीतलः शीतो हिमः सप्ताऽन्यलिङ्गकाः
ध्रुव औत्तानपादिः स्यात् अगस्त्यः कुम्भसम्भवः
मैत्रावरुणिरस्यैव लोपामुद्रा तपस्विनी
नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्
दाक्षायिण्योऽश्विनीत्यादितारा अश्वयुगश्विनी
राधाविशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया
समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः
मृगशीर्षं मृगशिरस्तस्मिन्नेवाऽऽग्रहायणी
इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः
बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः
शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः
रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः
सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः
राशीनामुदयो लग्नं ते तु मेषवृषादयः
सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः
भास्कराहस्करब्रध्नप्रभाकरविभाकराः
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः
पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः
इनो भगो भामनिधिश्चांऽशुमाल्यञ्जिनीपतिः
माठरः पिङ्गलो दण्डश्चण्डांशोः परिपार्श्वकाः
सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः
परिवेषस्तुपरिधिरुपसूर्यकमण्डले
किरणोस्रमयूखांऽशुगभस्तिघृणिरश्मयः
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्
स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः
कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका
कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः